No. ४४६८-घ

Title विवाह पद्धति:

Author

Extent १५ Age

Subject

नं० ४४६८—घ

~~विवाहपद्धतिः~~

नं० ४४५८—घ

पत्राणि १५

५५१४

F = 15

नं० ४४९८ च

विवाह पद्धतिः

पत्राणि १५ (पञ्चदशानि)

अथ चतुर्थदिने प्रातश्चतुर्थीकर्म । तत्र मातृपूजनस्य नववैश्वदेवस्य श्राद्धस्य श्रोत्रायनकृ
र्यता । विवाहादीनि चतुर्थीपर्यन्तानि यानि कर्माणि तेषामेव कर्मेव मातृपूजनं श्राद्ध
वा कर्मण्युदीपोच्यत्वात् । अथ लक्ष्मणहर्वनमग्निं प्रणीय समिधं दत्वा पात्राण्यासाद्य यथो
पयुक्तानि उदपात्रं च समिज्जपादि विरूपाक्षान्तं समिधं दत्वा महाव्याहृतित्रयं कृत्वा अ
ग्नेः प्रायश्चित्त इत्यादि पञ्च स्वपि मन्त्रेषु पालेपी स्त्री रिति पदमुद्दिश्य पञ्चाज्याहुतीर्जु
होति । अग्नेः प्रायश्चित्त इत्यादिभिः पञ्चभिर्मन्त्रैः पतिघ्नीरिति पदमुद्दिश्य पञ्चाज्याहुती
र्जुहोति । पुनरप्येभिः पञ्चभिर्मन्त्रैः अपुत्र्येति पदमुद्दिश्य पञ्चाहुत्यान्तो जुहोति । पुनरप्ये
भिः पञ्चभिर्मन्त्रैः अपशव्येति पदमुद्दिश्य पञ्चाहुत्याती जुहोति एवं आहुतिर्विंश
तिर्जुहोति । आहुतराहुतेर्बिन्दुशेषमुदपात्रे ऽवनयेत् तेना [illegible] मभिषेकेणोदकेन

वधूमापादतलमस्तकाभ्यञ्जोद्धृत्तेनाहिषि स्त्राज्यं ज्ञासायित्वा ब्रह्मावर्यं त्ति। स्नाता

तायां प्रायश्चित्तार्थं चित समिन्धाहुतिन्निर्जुत्वा पुनास्ति समितस्या निदाहि सर्वं द

त्वास्ह्विलांतं लत्वा वामदेव्यं गीत्वा समापयेत्। धर्मांते सर्वं ग्रामालणानोजनस

ल्पः। चतुर्थे धर्मणि पत्न्या उपवेशनं गोत्रसेनोत्त्वे। स्त्रीणामा चाराश्चे उपवि

शति तदा वामतो गेऽउपविशति। स्ना नादनंतरं। नयहर्वं अनुलत्वा दिति। वर्धं

विंशा कृतीपदं आदृतः। ब्रमज्ञिह्यपः। मंत्राम्नाये। स्नइत्येतत्स चक्रं लाद्य वाधि

नि। पक्ष्यते तस्य योगेस्या न्मंत्राणामत्र विंशतिः। अग्ने स्वाने वायुर्यंद्र सूर्यांव

रुच इत्यचा। सम स्यपंचमी सन्ने चतुश्चतुरि तिश्रुतेः। प्रथमे पंचन्ने पापालक्ष्मी

रितिपदं नवेत। अपि पैवस्नुमं शेषु इतियत्। विदो विदुः। द्वितीये तु पति घ्नी स्यादु

ल्पोयावाहेवला॰ यस्मिन्मंत्रे इन्द्रऋषिः अनुष्टुप्छंदः गावोदेवता गृहप्रवेशने वि॰
अयतस्या उत्संगे कुमारमुपवेश्य कुमारीं लिंजैन्नाञ्जलोटैः संपूर्य पूर्ववैर्वा कुमारं
स्नापयंति। ताएव बालल्पपतिर्वा कुमारमनु स्नापयेत्। अथवरः कदलफूवमग्निं
स्तीर्यसमिधं दत्वा गृहोपवेशनादिविरूपाक्षोत्ने समिधं दत्वा स्त्रुवसंमार्जनमग्नि
तपनं च कुर्यात्। आज्यसंस्कारावसरेस्त्रुवसंस्कारं कृत्वा तिस्रमिर्व्याहृतिभिकृ
त्वाघृतेनैवास्मा कुलं जुहोति। अस्मिन्निहधृतिरिति। इहधृतिः स्वाहा। इहस्वधृतिः। इह
रतिः। इहरमस्व स्वाहा। मयिधृतिः। मयिस्वधृतिः। मयिरमः। मयिरमस्व। अत्र वल
धीनप्रयोक्तव्या। धर्मप्रदीपोक्तनिषेधविरोधात्। धृतिहोमेन प्रयुंज्यकोनाम सुत
थाहसु। चतुर्थी मध्यस्त्येतज्ञोनाग्निनहिस्यते। इहधृतिः प्रजापतिर्हृदा॰ बृहती छं॰ जाया
दे॰ होमेवि॰। अत्रमंत्रप्रयोगे तत्त्वा वारुतिर्निर्ऋतिर्वा पुनरग्निसमिधं दत्वा। विधा
गुरुपुकृतिं यथा ज्येष्ठं गुरुं नमस्कारयेत्। गोत्र अमुक शर्मा अहं भो अभिवादयामि। स्ववर्तो स
व्यासदक्षिणेन स्पृष्ट्वा दक्षिणगहस्तं सव्यं नसव्य गुरूणां पादवंदनं कुर्यात्। यथाश्रेष्ठं च गुरुपित्रादि वंदन
श्चतस्तम्भिः

स्ताः श्मशानानि च नयंति तत्र तत्र मा विदन्‌ परिपंथिन इति जपेत्‌। आस्मिन्‌ मंत्रे देव
ऋषिः अनुष्टुप्‌ छंदः आशास्यमाना देवता चतुष्पथादौ मंत्रणे विनियोगः। रथां
गमंगं गत्वा पतत्सु संजातासु लक्षणेषु एवं विवाहाग्निं प्रज्वाल्य चाज्यं संस्कृ
त्य हविः प्रहोम मन्त्रायेन च तस्र स्निव्यो इति भिः प्रायश्चित्तं कृत्वा नूतनं रथांगमाहृत्य
2 यस्ते चिदभि श्रिष इत्यनेन सामगीत्या जयभोजेनाभ्यनक्ति। अत्र प्रजापतिर्‌ ऋषिः
बृहती छंदः मघवा देवता अभ्यंजने विनियोगः। ततो वामदेव्यं गीत्वा वधूमारोह
येत्‌। यत्रैव प्रायश्चित्तमापतितं भवति तत्रैव तत्कालं हविः प्रहोम मन्त्रायेन कृत्वाऽथा
न्यद्वेष्टेत्‌। धर्मोपघाते प्रायश्चित्तं तत्कालमिति शाट्यायन वचनात्‌। यत्र स्वगृह
गुं न दृश्यते तत्र सामग्रतेतव्यमिति सर्वत्र। अथ गृहे वा सभ्यतो लक्ष्मी समीपं प्राप्य
वामदेव्यं गीत्वा वधूं मंडपसमीपं नयति। ओं मंगलं गत्वा पतिपुत्र शीलसंपन्ना ब्राह्म

स्यनाभिः। अनुवाकेनाचिक्रितुषेजनायमागामनागामदितिंवधिष्टेति। अत्रकिंचिद्वाच्यं। कंसपात्रे
ताम्रपात्रे अर्घ्यं। कांस्ये नैवाह्लीयस्य निनयेदर्घ्यमंजलौ। कांस्यापिधानं कांस्यस्थं मधुपर्कं
समर्पयेत्। साहतः सुमनोयुक्तमुदग्रं दधिसंहितं। अर्घ्यं दधिमध्वाज्यं मधुपर्को विधीयते
अनेनक्रमेणप्रदीपवाक्यद्वयेनअर्घ्यंअर्घ्यपात्रंचमधुपर्कद्रव्यत्रयंचमधुपर्कपात्रेचएतत्स
र्वमुक्तंतंनिरीक्ष्यात्रैवान्नगदितं। इतिश्रीयहोत्राविष्णुकृतंमधुपर्कविधिःसमाप्तः। अथसंप्र
दानं। तच्चस्वशाखायांनाम्नातं। अविरोधात् शाखांतरात्कृतत्वाच्च। आश्वलायनोदृष्टव्योक
न्यावरयमालायामिति। स्वंतुसंप्रदानविधिरुच्यते तन्मूलाचारापिक्रमप्रकृतिलिख्यते।
शुचौदेशेवरपक्षीयाश्चत्वारःपुरुषाःप्राङ्मुखास्तिष्ठंति। कन्यापक्षीयाश्चत्वारःपुरु
षाःप्रत्यङ्मुखाः। ततोदातातान्प्रत्यङ्मुखान्पुष्पचंदनतांबूलयज्ञोपवीतवस्त्रादिभि
ःपूजयित्वा। पुण्याहितमस्त्वित्यादिभिःपंचभिर्द्विर्द्विर्वाचयित्वाप्रत्यङ्मुखानपिवरंच
नपुष्पयज्ञोपवीततांबूलादिभिरर्चयित्वावरपक्षाह्वानयेदिति। सदाचारः। शाखोपवेव

ब्राह्मणान्वाचयित्वा वरं वाचयेत्। अथ प्रथमं वरपुरुषाणां मध्ये एवं: पितापुत्रौ वद
द्भिः गोत्रः प्रवरः शर्मणः पौत्रः पुत्रः। अ॰ शर्मा एवं द्विः। अथ कन्यापक्षीयैश्चोव देवं गोत्राः
प्रवराः शर्मणः प्रपौत्री। पौत्री। दुहिता अ॰ दा। एवं द्विः। संप्रति च शिष्टाश्च लुकुत्वोवदं सं
3 तरा अंतरेति। अथ वरस्य पादौ प्रक्षाल्याहते वाससी परिधाय यज्ञोपवीतं परिधाप्य
चतुष्पचे दनेरभ्यर्च्य धूपैर्दर्शयित्वा सुप्रोक्षितमास्त्वित्यादि त्रिर्द्विः स्वस्तिं वाचयित्वा
वरस्य दक्षिणत उपविश्य सालंकारां कन्यां ददाति। गोत्राय प्र वराय पौत्राय पुत्राय
१ क अमुकशर्मणे ब्राह्मणाय। दत्तगोत्राः प्रवराः प्रपौत्री पौत्री पुत्री इयं कन्या सालंकारा ल
[illegible] प्रदत्तेति उत्कादर्जां दत्तयुक्तमुदकं वरहस्ते निक्षिपेत्। वरः स्वस्तीति ब्रूयात्। दा
दैवुस्मा इत्यनेन वरः कन्यामभिमृशेत्। अस्य मंत्रस्य प्रजापतिर्ऋषिः यजुश्छंदः कामो दे
वता। कन्याभिमर्शने विनियोगः। अथ दाता ब्रूयात्। धर्मे चार्थे च कामे च नातिचरितव्या
त्वयेति ब्रूयात्। वरोऽपि बाढमिति ब्रूयात्। ततो दाता दक्षिणाः पात्रं तु वकुदेयं वास्तु। प्रजापतिः
प्रीयतामिति पिकरण मुहूर्ते शतनक्षत्र लग्नसंपदः संतु। उं पुण्याहं। उं दाहुरोवक्षिणां दाद्विः। अथ वरः।

व्रतोदयाहंकुंन्याहब्रह्मणंरुत्विजंवाह्युतःकुर्वन्

नकर्त्तव्यंवपनंतथा।वपनंव्रीह्यादिनिर्वापः।गृहीतांऽजलिवरः।ॐअग्निंपरिणयति।
त्वन्यलापितृभ्यइति।अस्मिन्मंत्रेरुद्रऋषिःत्रिष्टुप्छंदःअग्निर्देवता।परिणयने
विनियोगः।त्वन्यलापितृभ्यइति।परिणयनांतेपूर्ववत्आरोहणादिसर्वं।अग्निधार
णंत्रत्यग्निधारणंब्रह्मचिन्तनमन्यंते।अर्यमणमितिद्वितीयः।अस्मिन्मंत्रेरुद्रऋषिः
उपरिष्टाद्बृहतीछंदःअर्यमादेवता।लाजाहोमेविनियोगः।अर्यमणमिति।त्वन्य
लापितृभ्यइति।पुनरग्निंपरिणयति।पूर्ववद्द्विछिंदत्यंनालिमासमंजंत्वित्यग्नि
मत्रात्द्वितीयपरिणयनांतंतथैवसर्वमारोहणादिपूषणमितितृतीयहोमः।
अस्मिन्मंत्रेरुद्रऋषिःअनुष्टुप्छंदःपूषादेवता।लाजाहोमेवि०पूषणंनुदेवं०।
त्वन्यलाइतिपूर्ववदग्निंप्रणयति।तृतीयपरिणयनांतेपूर्ववदश्मारोहणादिसर्वं।
तत्कांश्चपेल्लैवकलाजाहोमंकरोति।चतुर्थपरिणयनांतेसप्तपदस्थानाथंब्राह्मणीद्वाभ्यां

स्त्रां जुहोति। भूर्भुवः स्वरिति मंत्रे प्रजापतिर्ऋषिः पंक्तिश्छंदः प्रजापतिर्देवता। होमे विनि
योगः। ॐ भूर्भुवः स्वः स्वाहा। कृत्वा दंपती उत्तिष्ठतः। अथ वरोऽनुपृष्ठं परिक्रम्य दक्षिणत
उदङ्मुखोऽवतिष्ठते वध्वंजलिं गृहीत्वेति। पूर्वस्यां दिशि स्थिता माता भ्राता वा वामहस्ते
लाजाशूर्पं गृहीत्वा दक्षिणहस्तेन वध्वा दक्षिणं पादं शिलां आरोहयेत्। पाणिग्राहो ज
पती मम त्वमानमारोहेति। अस्मिन्मंत्रे दक्षऋषिः अनुष्टुप्छंदः अश्मा देवता। अश्मा
क्रमणे विनियोगः। इममश्मानमा॰ घः। भ्रन्यांजलौ उपस्तारं दत्वा लाजानामंजलिं
तत्र निक्षिप्य प्रत्युपस्तारं ददाति। इयं नार्युपब्रूत इति वरो जपति। मंत्रांते होमं वधूः
करोति। अस्मिन्मंत्रे दक्षऋषिः पंक्तिरुपरिष्टाज्ज्योतिष्मती छंदः अग्निर्देवता।
लाजाहुतौ विनियोगः। इयं नार्युपब्रूते॰। गृहीतांजलिं वधूर्जुहोति। सोमतीर्थेन
उक्तं च। त्रिविधाः सुराले। धनायुर्दारसेवायां सोमतीर्थं तु मध्यमं। काम्या दिहवने ते

समीपे धृत्वा दक्षिणहस्तेन वधा दक्षिणं पाणिः सांगुष्ठमुत्तानं गृहीत्वा प्र
एमं त्वान् पाणिग्रहणीया मंत्रणां मिन इति प्रमृती नृ जपति । ओऽ ते षु मंत्रे ॥ पुरस्तात्पंक्तिः दृष्टुः १६८
प्रथमे जगत्यो ऽग्निर्धीयमानो देवता । पाणिग्रहणे विनियोगः । अघोरचक्षुरिति यमंत्रे आ
शास्यमाना देवता । आ नः प्रजामिति त्रितीये मंत्रे जगती छंदः प्रजापतिर्दे. । इमां त्वमिंद्र
ति चतुर्थे मंत्रे इंद्रो ऽनुष्टुप् । सम्राज्ञीति पंचमे मंत्रे वृन्या दे: दृष्टुः १० । मम व्रत इति षष्ठमं
त्रे बृहस्पतिस्त्रिष्टुप् २ । एवं पाणिग्रहणं तेऽथ्नौ अग्निसमीपमागत्य पूर्ववदुपविश्य
मायश्चित्तार्थं चेतस्तव्याहृतिभिर्हुत्वा पुनस्त्रिस्रभिः समिध इति त्र समाप्य यथाश
क्ति दक्षिणां पूर्णपात्रादिकं दत्त्वा ब्राह्मणभोजनसंकल्पं कृत्वा वामदेव्यं गीत्वा समा
पयेत् । वामदेव्यं नृ वे वा गायेत् । वामदेव्यसाम्नि वामदेव ऋषिः । गायत्री छंदः प्र
जापतिर्देवता । शांत्यर्थगाने विनियोगः । कापूया ॥ छ ॥ इति ॥ श्रीगणेशाय नमः ॥

दिशं वधूं सुहृदो नयंति। एवमेव मंडलं दक्षिणेन पादेन वधूराक्रामति। वामं च पादं प
श्चात्करोति। मा सव्येन दक्षिणमतिक्रामेति ब्रूयात्। इति। एवमिष इत्यादिसप्तभिर्मं
त्रैः सप्तपदानि पृथक् पृथगाक्रामति। सप्तसु मंत्रेषु प्रजापतिरृषिः यजुश्छंदः विष्णुर्देव
ता पादाक्रमणे विनियोगः। एकमिषे विष्णु०। याः स्त्रियः पुमांसो विवाहं द्रष्टुं आगता
स्तानिरीक्ष्य वरो जपेत्। सुमंगलीरिति। अस्मिन्मंत्रे प्रजापतिरृषिः अनुष्टुप् छंदः आशास्य
माना देवता। शुभे लग्ने जनप्रतिमंत्रणे वि०। सुमंगलीरिति। अदृष्टः पुरुषः पूर्वोत्ति
ष्ठितो ऽपरेणाग्निं प्राग्दक्षिणेनागत्य वरसमीपं पूर्वं गृहीतात्कुंभादुदकं गृहीत्वा प्राग्द
क्षिणाहस्तेनोदकं गृहीत्वा वरं वधूं शिरसि युगपदभिषिंचति समंजंतु विश्वेदेवा इति
इमं मंत्रं वरो जपेत्। अस्मिन्मंत्रे प्रजापतिरृषिः। अनुष्टुप् छंदः विश्वेदेवादयो देवताः। अ
भिषेचने विनियोगः। समंजंतु वि०। नौ। पूर्वगृहीतमंजलिं वरः सव्यहस्तेन मणिबंधे

ब्रह्मलोन्नस्तुतोच विनियोगः। यस रिज पितमन्नंतम्पतिस्वयंतुंजीतप्रथमंयद्वितीयंमा
गमनग्निमंत्रितं तस्यान्नस्यमुखिष्टंपश्चाद्भुंजीत। ओजनसंनेवउपवा सेसेजीत
प्रातस्समश्नानीयंचरुं अपयित्व कृत्वा पूर्वोक्तेनविधिनाभुंजीत। समश्नानीयस्थाली
पाकस्य देवता। अग्निः प्रजापतिर्विश्वेदेवाअनुमतिरिति। स्थाली पाकधर्मेणश्रप
यित्वा स्थाली पाके आज्यं निक्षिप्य मेक्षणेनोपघातं कुर्यात्। अवदानधर्मेणानु
कुर्यात्। उद्धृत्य स्थाली पाकं पात्रांतरे कृत्वा। पूर्वेद्युर्देशं पालनाग्निम्शेदन्नपाशेन
मलिनेति। पूर्वोक्तविधिनाभुक्त्वाचम्य च श्रीमल्लोदक्षिणांदद्यात्। आचार्यस्यवा।
छ॥ ॥अथपत्नीवधूंयानमारोप्यस्वगृहंनयति। यानमारोहंत्याः पतिर्जपेत्।
सुकिंशुकं शल्मलिमिति। अस्यमंत्रस्य ऋषिः त्रिष्टुप् छंदः सूर्यादेवता। रथादि
यानमारोहणे विनियोगः। मार्गे [illegible] वयव चतुष्पथा [illegible] नद्योऽभ्यासेलिव महा ह

7

तत्रं समाप्य पूर्णपात्रं यथाशक्ति दक्षिणां दत्वा आहिताग्निर्भोजनसंकल्पं कृत्वा हवि
ष्यान्नदेव्यं गायेदिति। आगुदत्यां दक्षिणपदं निरूपगृह्यकृतं तस्मादेवं न्यावतो गृहेवे
दिष्टपितृं विदिशानमास्थितस्य पूर्वोक्तं कर्म कुर्यात्। अवृत्तेतदपिवरस्य प्रतिश्रि
शः। तस्मिन्नेव विवाहाग्नौ तवैवैते स्थिरहोमन्यायेन कुर्युः। अत्र ग्रामधर्मा जनपद
6 धर्माश्च वृत्तव्याः स्त्रियो यत्कार्यं तन्न कर्तव्यमिति।छ॥ इति ध्रुवदर्शनं॥ अत ऊर्ध्वं
भोजनं कुर्यात्। अक्षारालवणाशिनौ स्याताम्। एवमस्मिन् संस्कारे अलवणाशिनौ संतौ शयी
यातामिति नियमः। प्रथमभोजने विशेषः कथ्यते। एवमस्मिन् मार्गे यथासिद्धमन्नं हवि
ष्यं हविः कृत्वा एकं भागं दक्षिणहस्तेनाभिमृशेत्। अन्नपाशेन मणिनेति। अस्मिन् मंत्रे प्र
ऋषिः अनुष्टुप्छन्दः। अन्नं देवता। अन्नप्राशने विनियोगः। अथ यदेतत्कृतयमिति मंत्रं
जपेत्। अस्मिन् मंत्रे प्रजापतिः ऋषिः त्रिपदा गायत्री छन्दः। अन्नं च पत्न्यश्च देवते हृदये

गत्वा वरो वधूं ब्रूयात् । ध्रुवं पश्यति । तथा ध्रुवमसि ध्रुवाहं यशोदा देवदत्त पतिकुले भू
यासमिति । वरो वधूं भाषयेत् । वधूश्च मंत्रं जपमाना ध्रुवं पश्यामीति । अरुंधतीं
पश्येति वरं ब्रूयात् । तथा अरुंधत्यसि रुद्धाहं । यशोदास्मि देवदत्तेति वधूं भाषये
त् । वधूश्च मंत्रं जपति । अरुंधतीं पश्येति । अथ कृतांजलिर्वरो वधूं सन्मुखो भूत्वा
ध्रुवा द्यौरिति मंत्रं जपेत् । अस्य मंत्रस्य ऋषिः अनुष्टुप् छंदः आशास्यमाना देव
ता ध्रुवानुमंत्रणे विनियोगः । ततो वधूः शाली यव स्पर्शपूर्वकं भर्तृपादौ स्पृष्ट्वा द
क्षिण हस्तेन दक्षिणं सव्येन सव्यं भर्तृगोत्रेणाभिवादनपूर्वकं पादवंदनं कुर्यात् ।
प्रयोगः कथ्यते । अमुकगोत्रा प्रवरा अमुकी दास्यहं भोः अभिवादयामीति पतिस्त्वा
शिषं दद्यादिति । ... भूर्भुवः स्वः ... भाषयेत् । अत्र वाग्विसर्गविधाः । अथाग्नेः प
श्चादुपविश्य ... व्याहृतिभिः हुत्वा पुनः ... हुत्वा समिदाद

उक्तो मूलविवाहो ध्रुवदर्शनिमुच्यते। अगुरीच्यां दिश्यत्रिरूपकुलण्डे पालिग्रहण
कर्मणोऽनंतरं वरसहयो वरेण सह वधूं नयति। वरः प्रथमं सुवेदेश लक्षणपूर्वम
ग्निं प्रणयति। समिधं च तत्स्थी स्थापति: ततोऽग्नेः पश्चादानडुहं रोहितं चर्म प्राग्ग्रीवमुत्त
रलोमास्तीर्य तस्मिन्नेमां कन्यां मौनिनीमुपवेशयंति। सा तत्रोपविष्टा आ नक्षत्रद
र्शनादास्ते दृश्यते ध्रुव इति अनेन चिह्नुके वरो अलोपवेशनादि विरूपाक्षांते समिधं
7 दत्वा स्रुवसंमार्जनप्रतपने कृत्वा पूर्ववद्बृहस्पतेर्दक्षिणमतः समन्वारब्धायां वध्वां
महाव्याहृतिभिस्तिस्र आज्याहुतीर्हुत्वा लेखासंधिष्विति एतस्य व्याहृतिः षडाज्याहुतीर्जुहो
ति। आकूतेराकूतो बिंदुशेषं वध्वाः शिरस्यवनयेत्। व्याहृतीनां बिंदुशेषं नावनयेत्।
लेखासंधिष्वित्येतस्य मंत्रस्य प्रजापतिर्ऋषिः अनुष्टुप् छंदः कन्या देवता बन्धो
गस्थिता लक्षणनाशने विनियोगः। लेखा०। ६। ततोऽनंतरं वध्वाः सह बहिस्तरणो

न्तत उत्सिष्टं भवति। उत्सिष्टे हन्त्र हस्ते आत्मना भिआयश्चित्ती भवति। अतः सर्वत्र चान्ते आचामेत्।
उच्छिष्टः स न्नं अंत्रो ह्यारल्लेब्र थं कुर्यात्। अधमं चोह्यारत्वां ग्रानकुर्यात्। मनुशाराचारौ। प्राणाकृती
षु सोमे च मधुपर्के तथैव च। अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः इति। तथा च त्यासंयहः।
मधुपर्के तथा सोमे अप्सु प्राणाकृतीषु च। आस्य होमेषु सर्वेषु नोच्छिष्टो भवति द्विजः। अपवर
णाच मनेखलगोगौगौरिति नापितस्त्रिर्ब्रूयात्। मुंचगामिति वरो जपेत्। अस्मिन्मंत्रे वसिष्ठ
ऋषिः बृहती छंदः गौर्देवता। गोरनुमंत्रणे विनियोगः। मुंच गां वरुणपाशाद् द्विषंतं मे भिधेहि। ह
तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकं इति च ब्रूयात्। द्विषंतं शात्रवं कुर्वंतं
मां प्रति अभिधेहि जहि च अमुष्य यजमानस्य च यो द्वेष्टा तं अभिधेहि जहि चेति। उत्सृष्टा
यां गवि वरस्तामत्ति मुखो जपेत्। माता रुद्राणामिति। अस्मिन्मंत्रे वसिष्ठ ऋषिः अनुष्टुप् छं त्रिष्टुप्
दः गौर्देवता। गोरनुमंत्रणे विनियोगः। माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृत

मिति। अथ यजमानं पुरुषाः आचमनीयमुदपात्रं गृहीत्वा ब्रूयुः। आचमनीयं ३ प्रतिगृह्यतां। त
तो वरः प्रतिगृह्णामीत्युक्त्वा आचामति। यशोसीति सलत्वाहिस्त्रस्लीं। अस्मिन् मंत्रे वसिष्ठ ऋषिः
यजुश्छंदः आचमनीयं देवता। आचमने विनियोगः। यशोसि यशो मयि धेहीति सत्वाहिस्त्रस्लीं॥
अथ यजमानः पुरुषाः दधिमधुघृतं कांस्यपात्रस्थं कांस्यविहितं नत्वा ब्रूयुः। मधुपर्को २ मधुपर्कः
प्रतिगृह्यतां। ततो वरः यशसा इति मंत्रेण प्रतिगृह्णीयात्। यशसा इति मंत्रे वसिष्ठ ऋषिः
यजुश्छंदः मधुपर्को देवता। मधुपर्कग्रहणे विनियोगः। यशसो यशोसीति॥ अथ वरउद्वाहस्वद्व
लेन त्वा च त्वा दक्षिणा लिनहस्तयेत्। अंगुष्ठेन सह कनिष्ठिकया प्रथमं। अनामिकया द्वितीयं। मध्य
8 मया तृतीयं। प्रदेशिन्या चतुर्थी यशसो भक्षोसीति श्री लिनद्वाल मंत्रेण चतुर्थं तत्स्लीं प्रदेशिन्या। अ
स्मिन् मंत्रे वसिष्ठ ऋषिः यजुश्छंदः मधुपर्को देवता मधुपर्कग्रहणे विनियोगः। यशसो भक्षोसि महसो
भक्षोसि श्रीभक्षोसि श्रियं मयि धेहीति मंत्रेण त्रिः पिबेत् तत्स्लीं चतुर्थं प्रतिगृह्य नावामति। पात्रं त्यक्त्वा वे
स्वोरोह्ने पलमेकं घृतं चैव द्विपलं दधिमुच्यते। पलार्द्धं मधुनश्चैवं मधुपर्कः स उच्यते॥

दक्षिणं पादमित्यस्मिन्मंत्रे वामदेव ऋषिः विराट् छंदः श्रीर्देवता दक्षिणपादप्रक्षालने विनियोगः ॥

वसिष्ठ ऋषिः विराट् छंदः आपो देवता पाद्योदकावनेजने विनियोगः । यतो देवीः प्रतिपश्यामि आपस्ततो मा
राद्धिरागच्छतु । इति अवैधेरः स्वमंजलिं तेन पूरयित्वा वामपादोपरि निक्षिपेत् । सव्यं पादमिति मंत्रे वसि
ष्ठ ऋषिः विराट् छंदः श्रीर्देवता । सव्यपादप्रक्षालने विनियोगः । सव्यं पादमवनेनिजेऽस्मिन्राष्ट्रे श्रि
यं दधे इति । पुनस्तेनैवोदकेन स्वमंजलिं पूरयित्वा दक्षिणपादोपरि निक्षिपेत् । दक्षिणं पादमवनेनिजे
ऽस्मिन्राष्ट्रे श्रिय[illegible]मावेशयामि । पुनर्वरस्तेनोदकेन स्वमंजलिं पूरयित्वोभयपादोपरि निक्षिपेत् । पूर्व
मन्यमिति मंत्रे वसिष्ठ ऋषिः विराट् छंदः श्रीर्देवता । उभयपादप्रक्षालने विनियोगः । पूर्वमन्यमपर
मन्यमुभौ पादाववनेनिजे । राष्ट्रस्यर्ध्या अभयस्यावरुध्यै । अथ यजमानोऽन्येनोदकेन तु वर
स्य पादौ प्रक्षालयति । अथ यजमानः पुरुषः कंसादिपात्रस्थं साक्षतं सोदकं सदधि सुमनोयुक्तं क
रांभ्यां निवेदयीत । अर्घ्यं प्रतिगृह्यतामिति ब्रूयुः । अथ वरः अन्नस्येति मंत्रेण प्रतिगृह्णीयात् । अ
स्मिन्मंत्रे वसिष्ठ ऋषिः यजुश्छंदः राष्ट्री देवता मधुपर्कग्रहणे विनियोगः । अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयास

अर्घ्य ॥ २ स्त्वां [illegible] नितीयमानमर्घ्यं

१ पुदर्भाः अर्हणीति मंत्रेण वसिष्ठ ऋषिः अनुष्टुप् छंदः गौर्देवता गोरूपस्थाने विनियोगः ॐ अर्हणापुत्रवास
साधेनुरभवद्यमे । सा नः पयस्वती दुहा उत्तरामुत्तरां समां ॥ अथेदमहमिति विराजं जपेत् । आसन
२ यजुष्टुं मंत्रे वसिष्ठ ऋषिः विराट् छंदः विराड् देवता जपे विनियोगः । इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठा
मि । अथ यजमानं पुदर्भाः पंचविंशति पंचविंशति कुशापत्रमयौ विष्टरौ गृहीत्वा विष्टरौ ३ प्रतिगृह्यतां इति ब्रू
युः ततो वरः प्रतिगृह्णामीत्युक्त्वा तौ गृहीत्वा या ओषधीरिति मंत्रेण वसिष्ठ ऋषिः अनुष्टुप् छंदः ओषधयो देवताः
विष्टरासनदाने विनियोगः । ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामस्मिन्नासने ऽछिद्राः शर्मय
पाद्यं १ छतेति मंत्रेणैकं आसने निधाय उपविशेत् । द्वितीयं विष्टरं पादयोरधस्तान्निदध्यात् या ओषधीरिति मंत्रेण
वसिष्ठ ऋषिः अनुष्टुप् छंदः ओषधयो देवताः पादयोरधस्ताद्विष्टरनिधाने विनियोगः । या ओषधीः सोमराज्ञी
र्विष्ठिताः पृथिवीमनु । तासामस्मिन्पादयोरधि छिद्राः शर्म यच्छतेति । अथ यजमानः पुदर्भाः पाद्योदकं गृहीत्वा
पाद्यं ३ प्रतिगृह्यतामिति ब्रूयात् । ततो वरः प्रतिगृह्णामीत्युक्त्वा पाद्योदकेऽवेक्षणं करोति यतो देवा इति मंत्र

४ न दुपविशप्राङ्मुख

२नपाति

ततः प्राश्यां पतियान इति वरो जपेत्। ऋषिछंदसिदैवतविनियोगं च। वेदितकटं
प्रसार्य बाहिः प्रापयेत्। पूर्वेकटांते प्राङ्मुखो वर उपविशति। तद्दक्षिणतो वधूः। द
कुशो२ क्षिणेनावरस्य हस्तेनालभ्य संप्रचार ब्राह्मणाः वधाः सकलेनाज्यं गृहीत्वा महाव्याहृतीनि
तिस्रो जुहोति। भूरि तिमंत्रस्य विश्वामित्र ऋषिः गायत्री छंदः अग्निर्देवता व्याहृतिहो०।
ॐभूः स्वाहा। भुवरिति जमदग्निऋषिः उष्णिक् छंदः वायुर्देवता व्याहृतिहो० ॐभुवः स्वा
हा। ॐस्वरिति मंत्रस्य भरद्वाजऋषिः अनुष्टुप्छंदः आदित्यो देवता व्याहृतिहो० ॐस्व
ः स्वाहा। अथाग्निरेतु प्रथम इत्येतस्य न्नतिभिः षडाज्याहुतीर्जुहोति। एषु षट्सु मंत्रेषु
इदमग्नये० दक्षऋषिः जगती छंदः अग्निर्देवता आज्यहोमे विनि०। अग्निरेतु०। द्वितीयेऽतिजग
त्यग्नि॰ स्तृतीये तिजगती विश्वेदेवाश्च तुर्थेऽग्निः शाक्करी। पंचमेऽग्निरूप परिष्टाद्बृ
वैवस्वताय० हती। षष्ठे त्रिष्टुब अग्निवैवस्वतस्तिस्रो जुहोति। छंदऋषिदैवतं पूर्ववत्। चतुर्थी तु सम

२विश्वेभ्यो देवेभ्यो नमम

ततोहस्तस्थितास्तैर्दर्भमालं प्रज्वाल्यित्वा समिधं अग्नौ क्षिपेत्। ततः स्रुवस्य पूर्वाभिमुखं
मार्जनं कुशैः कुर्यात्। अग्नौ प्रतापनं च। वधूसमीपं मंडपं आगत्याहतेवाससी परिधा
ययात्। अहतंतन्त्विति प्रथमं। परिधत्तेत्युत्तरीयं। अनयोर्मंत्रयोर्दक्षऋषिः जगती
त्रिष्टुप्छंदांसि। कर्त्तृः कंनुवायश्च परिधापयत्यश्वावदेवताः। अधरोत्तरवस्त्रप
10 रिधाने विनियोगः। या अकृंतंनवयन्या अतन्वत याश्च देव्यो० परिधत्तधत्तवाससे।
यज्ञोपवीतवत् दक्षिणं बाहुं बहिष्कृत्वा वेदीसमीपमानयन्जपेत् सोमोददद्
ति। अस्मिन्मंत्रे दक्षऋषिः अनुष्टुप्छंदः सोमो देवता। जपे विनियोगः। ॐ सोमोद०
दक्षिणहस्तेन वामहस्ते वधूं गृहीत्वा वेदीसमीपमानयति। वैणवंकटं वस्त्रं संवेष्टि
तं वीरणपादेन चालयंती वधूर्वा वयेत् इमे पतियान इति। अस्मिन्मंत्रे दक्षऋषिः त्रि
ष्टुप्छंदः पतिर्देवता। पादप्रवर्त्तने विनियोगः। इमे पतिया०। यद्येतं मंत्रं वधूर्न जपति
दक्षिणपादेनेति सर्वसम्मतं।

मामवंतुत्वत्तुवःस्वरोमहांतमात्मानंप्रपद्ये विरूपाक्षोसिदंतांजिस्तस्यतेशा
य्यापर्णेगृहाअंतरिक्षेविमितंहिरण्मयंतद्देवानांहृदयान्ययस्मेकुंभेअं
तःसन्निहितानितानिबलभृच्चबलसाच्चरक्षतोप्रमत्तोनिमिषतःसत्यं
यत्तेद्वादशपुत्रास्तेत्वासंवत्सरेसंवत्सरेकामप्रेणयज्ञेनयाजयित्वापुनर्ब्र
ह्मचर्यमुपयंतित्वंदेवेषुब्राह्मणोस्यहंमनुष्येषुब्राह्मणोवैब्राह्मणमुपधाव
त्युपत्वाधावामिजपंतंमामाप्रतिजापीर्जुह्वंतंमामाप्रतिकार्षीस्त्वांप्रपद्य
त्वयाप्रसूतइदंकर्मकरिष्यामितन्मेराध्यतांतन्मेसमृध्यतांतन्मउपपद्य
तां॰समुद्रोमाविश्वव्यचाब्रह्मानुजानातुतुथोमाविश्ववेदाब्रह्मणःपु
त्रोनुजानातुश्वात्रोमाप्रचेतामैत्रावरुणोनुजानातुतस्मैविरूपाक्षाय
दंतांजयसमुद्रायविश्वव्यचसेतुथायविश्ववेदसेश्वात्रायप्रचेतसेसहस्रा
क्षायब्रह्मणःपुत्रायनमः[illegible]प्रतिहौषीःकुर्वंतंमामा ५

वता।उदकांजलिसेचने विनियोगः। ॐ अनुमतेनुमन्यस्व। ततोऽन्नेकन्नरतस्सरस्वतीति
मंत्रेण प्राक्संस्थमुदकांजलिं प्रासिंचेत्। सरस्वतीतिमंत्रस्य प्रजापतिर्ऋषिः एकपदा गा
यत्री छंदः। सरस्वती देवता। उदकांजलिसेचने विनियोगः। ॐ सरस्वत्यनुमन्यस्व। ततो
देवसवितरितिमंत्रेण प्रदक्षिणमग्निं पर्युक्षेत्। देवसवितरिति मंत्रस्य प्रजापतिर्ऋषिः त्रिष्टु
प् छंदः सविता देवता। पर्युक्षणे विनियोगः। ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भ
गाय। दिव्यो गंधर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु। ततः समिद्ध
तान्गृहीत्वा तपश्चेति मंत्रमारभ्य प्राणानायम्य आत्मानं प्रपद्य इत्यंतं पठित्वा विरूपा
क्षोसीति मंत्रमारभ्यो छ्रुसंतत्वा जपेत्। प्रपद विरूपाक्षयो मंत्रयोः प्रजापतिर्ऋषिः
यजुश्छंदः। रौद्राग्निर्देवता। जपे विनियोगः। ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चा
क्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्वं च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि

ना। पवित्रसम्मार्जने विनियोगः। ॐ विष्णोर्मनसा पूते स्थः। तत आज्यस्थाल्यां अं तरे उदगग्रे

पवित्रे स्तृत्वाऽऽज्यं समावपेत्। ततोऽङ्गुष्ठाभ्यां अनामिकांऽगुलीभ्यां वोदगग्रे पवित्रे गृ

हीत्वा देवस्त्वेति मंत्रेणाज्यं प्राक्पुत्पवमुत्पुनाति। द्विस्तूष्णीमुत्पुनाति। देवस्त्वेति मंत्रस्य प

रमेष्ठी ऋषिः गायत्री छंदः आज्यं देवता। आज्योत्पवने विनियोगः। ॐ देवस्त्वा सवितो

त्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। ततः पवित्रे प्रणीतासु क्षिप्त्वाऽग्नौ

अग्नौ १ प्रक्षिपेत्। तत आज्यस्थाल्यां अधिश्रित्याऽग्नेरुत्तरत उद्वासयेत्। एवं आज्यस्य संस्का

रो भवति। ततोऽग्नेर्दक्षिणतोऽदितेऽनुमन्यस्वेति मंत्रेण प्राक्संस्थमुदकांजलिं प्रसिंचे

त्। अदित इति मंत्रस्य प्रजापतिर्ऋषिः एकपदा गायत्री छंदः अदितिर्देवता। उदकांजलि

सेचने विनियोगः। ॐ अदितेऽनुमन्यस्व। ततोऽग्नेः पश्चादनुमत इति मंत्रेणोदक्संस्थं

उदकांजलिं प्रसिंचेत्। अनुमत इति मंत्रस्य प्रजापतिर्ऋषिः एकपदा गायत्री छंदः अनुमतिर्दे

ला सनाद्दक्षिणां गृहीत्वा नैर्ऋत्ये निरस्त इति मंत्रेण प्रक्षिपेत्। निरस्त इति मंत्रस्य प्रजा
पतिर्ऋषिः यजुश्छंदः परावसुर्देवता। तृण निरसने विनियोगः। ॐ निरस्तः परावसुः।
-12 ततोऽप उपस्पृश्य ब्रह्मासने उदङ्मुख आवसो रिति मंत्रेणोऽपविशति। आवसोरिति
मंत्रस्य प्रजापतिर्ऋषिः यजुश्छंदः आवसुर्देवता। उपवेशने विनियोगः। ॐ आवसोः स
दने सीदामि। ततो ब्रह्माऽग्न्यभिमुखो वाग्यतोऽञ्जलिपुट आस्ते आकर्मसमाप्तेः। ततो
ग्नेः सर्वासु दिक्षु पुरस्ताद्दक्षिणत उत्तरतः पश्चादिति क्रमेण त्रिः कृत्वः पंचदश कृत्वो वा प्राग
ग्रैर्बर्हिःकुशैर्वा स्तृणाति। किं कुर्वन्। प्रागग्रैः कुशैः पूर्वास्तृतानां कुशानां मूलानि छादयन्।
तत उदकपूर्णं प्रणीतापात्रमग्नेरुत्तरत आसादयेत्। ततो विंशतिमिध्ममाहाय प्रजापतिं
ध्यात्वा प्रागग्रं तूष्णीं कुर्यात्। ततः बर्हिषः साग्रं अनंतर्गर्भं कुशद्वयं प्रादेशमात्रं पवित्रे
स्थ इति मंत्रेण छिंद्यात् न नखेन। पवित्रे स्थ इति मंत्रस्य प्रजापतिर्ऋषिः यजुश्छंदः विष्णुर्दे
X मंत्रस्य प्रजापतिर्ऋषिः यजुश्छंदः पवित्रे देवते [illegible] विनियोगः। ॐ पवित्रे स्थो वैष्णव्यौ। त
त एते पवित्रे प्रणीतासु [illegible] विष्णोर्मनसेति मंत्रेण सं (छि) मार्जयति। विष्णोर्मनसेति

ततो ऽग्न्यभिमुखो स्वस्थानस्थोपालीं कृत्वा पाणिभ्यां अग्नेः परिसमूहनमिमं स्तोममिति
त्र्चेन कुर्यात् ॥ इमं स्तोममिति त्र्चस्य कुत्सऋषिः जगती छंदः अग्निर्देवता परिसमूहने
विनियोगः ॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया भद्रा हि नः प्र
मतिरस्य संसदि अग्ने सख्ये मा रिषामा वयं तव ॥१॥ भरामेध्मं कृणवामा हवींषि चि
तयंतः पर्वणापर्वणा वयं । जीवातवे प्रतरं साधया धियो ऽग्ने सख्ये मा रिषामा वयं त
व ॥२॥ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं । त [illegible] मादित्या
आवह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥३॥ ततो ऽग्नेर्दक्षिणतो ब्रह्मास
नस्थाने ऽग्निं आरभ्य दक्षिणां यावदुदकधारामविच्छिन्नां कृत्वा ऽग्रेणाग्निं परिक्रम्य ब्र
ह्मासने प्रागग्रान्दर्भानास्तीर्य तेनैव प्रत्याव्रज्य स्वासने उपविशेत् । अथ ब्रह्मा आ
स्तृतानां दर्भाणां दर्भाग्रे प्रत्यङ्मुखस्तिष्ठन्सव्यस्य पाणेरंगुष्ठानामिकाङ्गुलीभ्यां ब्र

विनि

त्रीर्भितां प्रागग्रां पीतवर्णां सीमां उल्लिखेत् । ततः क्रमेण रेखाभ्यो ऽङ्गुष्ठप्रदेशिनीभ्यां उद्धृत्य खि
तमृदं गृहीत्वा ईशान्यां अरत्निमात्रे देशे निरस्येत् । ततो ऽद्भिरुक्षित्वा तत्स्थानं अभ्युक्षेत् ।१
ततः सुवर्णताम्रकांस्यादीनां अन्यतमेन पात्रेण अग्निं आनीय ततः समस्तव्याहृतिमंत्रस्य
प्रजापतिर्ऋषिः बृहती छंदः प्रजापतिर्देवता । अग्निप्रणयने विनियोगः । ॐ भूर्भुवः स्वरित्यग्नि
13 मुखमग्निं कुंडे स्थंडिले वा प्रणयेत् । ततो ऽग्निं प्रज्वाल्य तस्मिन् एव समिधं क्षिपेत् । ततो भूर्भुवः
स्वः वरदाग्निमावाहयामीत्यावाह्य संस्थापयेत् । ततो वामहस्तमुत्थाप्य ध्यायेत् । सर्वतः पाणिपा
दांतः सर्वतोऽक्षिशिरोमुखः । विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु इति । ततउपरोहाणि प्रो
क्षती ऽक्षतिच । ततः सव्यकरस्य वामभागे आग्नेयमभिमुखं दक्षिणकरं कृत्वा इमं देवमेरितिमं
त्रेण भूमिग्रहं कुर्यात् । इदं भूमेरिति मंत्रस्य परमेष्ठी ऋषिः अनुष्टुप् छंदः भूमिर्देवता । भूमि
ग्रहे विनियोगः । ॐ इदं भूमेर्भजामह इदं भद्रं सुमंगलं । परासपत्नान्बाधस्वान्येषां विंदते धनं ।

स्वस्तिरस्त्विति ब्रूयात्। अथाहस्पुण्याहवाचनं। वेदव्यासः। संपूज्य गंधमाल्याद्यैः। इति। यमः। पुण्या
हवाचनं दैवे० ब्रूयात्। अथ वरः शर्लकलशादुदकमुद्धृत्य ताम्नास्त्रीजनेकृत्वा उदकमभिमंत्र्या
नुमंत्रयेत्। अनाधृष्टमित्यनेन यजुषा। अत्र प्रजापतिर्ऋषिः यजु० सत्यं दे०। उदकांजलिमंत्रणे
विनि०। अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा। अनभिशस्त्येन्यमंज
सा सत्यमुपगेषं स्विते माधा इति। उदकाभिमंत्रणे द्वितीयमंत्रं यत्कक्षीवांसामिति प्रजा
पतिर्ऋ० अनुष्टुप् विश्वेदेवा दे० उदकाभिमंत्रणे वि०। यत्कक्षीवांसंवननं पुत्रो अंगिरसामभव
त्। तेन नोऽद्य विश्वेदेवाः संप्रियां समवीवनन्। अथ तेनोदकेन समुद्रज्येष्ठा इति चतसृभिरा
पोहिष्ठेति तिसृभिः कन्यामभिषिंचति तत्र समुद्रज्येष्ठा इति चतसृणामृचां वसिष्ठ ऋ० त्रिष्टुप्
आपो दे०। आपोहिष्ठेति तृचे सिंधुद्वीप ऋ० गायत्री० आपो दे० कन्याभिषेके वि० गः। समुद्रज्ये
ष्ठा० या आपो दि० २ यासां राजा वरुणो ३ यासु राजा वरुणो ४ तु। आपोहिष्ठीया स्तिस्रो
नमस्ति। समस्तसुमंगलेषु देवदे० गजेती छ० प्रजापतिर्ऋ० जपे वि० गः। अथ दास सुवर्णं कन्यायाः
नां पश्वादीनां प्रदानं यथाशक्तिः। एतत्सुवर्णं एतद्वस्त्रं एतावन्देयमित्यादि कन्यायै कन्यार्थं अर्ह
संप्रवेशयति। तत्र जनपदधर्मा ग्रामधर्माश्च कुर्युः। स्त्रियोऽपि कारयंतीति तत्कर्तव्यं। ग्रामवचनं
कुर्युरिति वचनात्। एतत्सुवर्णं विप्राय वरं चैतेति केचिद्वदंति। अनंतरं उत्तरयन्ना नारजमालमित्य
ताव संप्रदानविधिः। छ। अथ वरो वेद्यां गतोऽग्निमुज्ज्वलयति। इत्यादि। श्री।। ।। छ।। ।।

श्री॥ अथाग्निस्थापनं॥ तत्र आचार्यः कुंडपश्चिमे उपविश्य आचम्य प्राणानायम्य सोमसामं पठे
त्॥ अद्येत्यादि अग्निस्थापनं अहं करिष्ये इति संकल्प्य॥ कुंडस्योत्तरतः कर्मद्रव्याण्यासादयेत्॥
तद्यथा॥ उदकपात्रं॥ आसनं॥ कुशान्॥ बर्हिः॥ सायकुशान्॥ बर्हिः॥ विंशतिसंख्याकसमिधः॥ आज्यं॥
14 तिस्रः समिधः॥ कुशान्॥ औदुंबरस्रुवं॥ समिधं॥ मूलपात्रमित्यादिद्रव्यं प्रोक्षणं चैव उदगग्रं
आसादयेत्॥ ततः आवाहनं॥ अबोध्यादि सामगानं॥ ततः कुशैः कुंडभूमिं परिसमुह्य॥ गोम
येनोपलिप्य॥ सव्यं हस्तं भूमौ प्रतिष्ठाप्य॥ दक्षिणहस्ते कुशं गृहीत्वा कुंडस्य दक्षिणाग्रमारभ्य
त्रीन् कुशाग्रेण द्वादशांगुलां प्रागग्रां शुक्लवर्णां पार्थिवीं लेखामुल्लिख्य॥ तन्मूलसंलग्नमेव वि॰
शत्यंगुलामुदगग्रां लोहितवर्णां आग्नेयीमुल्लिखेत्॥२॥ ततः पार्थिवीलेखाया उत्तरतः षडं
गुलांतरं त्यक्त्वा आग्नेयीसंलग्नां प्रादेशमितां प्रागग्रां कृष्णवर्णामुल्लिख्य॥३॥ तद्रेखात स्या
वदंतरं त्यक्त्वा तथैव प्रादेशमितां नीलवर्णामैंद्रीमुल्लिख्य॥४॥ ततस्तावदंतरं त्यक्त्वा प्राद

यो तिरतीयत्रे। चतुर्थे त्वपशव्यत्याज्या आहुतिविंशत्रे। पंचमं त्वो[illegible] वत्स अथ महेत्न।
अग्निवायुचंद्रसूर्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयस्थ ब्राह्मणो वो नाथ
काम उपधावामि यास्याः पापी लक्ष्मी स्तामस्या अपहत स्वाहेति। इत्थं प्रयोगः।
पतिघ्नी रिति। अपुत्रिया इति। अपशव्या इति। शाह विशेषः। केचित्स्वाहुतिं पंचसम
न्यंते तेतथा कुर्वंति। विंशा आहुति पक्षे ऽस्माकं मत इति। अग्ने प्रायश्चित्ते त्यादीनां
मंत्राणां प्रजापतिरृषिः यजुषा छंदस्तेनास्तीति। प्रथमे मंत्रे ऽग्निर्देवता द्वितीये वायु
स्तृतीये चंद्रश्चतुर्थे सूर्यः पंचमे समस्ये अग्न्यादयः सर्वे देवा देवताः। यथावस
थ्यं जुहोति। ततो ऽस्मिन्नेवाग्नौ वैश्वदेवहोमादि गृह्योक्तं सर्वं कुर्यादिति।। छ।।
इति चतुर्थी कर्मा[illegible] विवाह[illegible] [illegible] संपूर्णं [illegible]
माप्तमिति।। सं. १८८५ वैशाखशुदि ३ सोमे रत्नावागरोलि. मिश्र जीवनरामेण [illegible]

अथवरस्यपिता विवाहदिवसेतत्पूर्वदिवसेवासत्तकाद्यंतरायसंभवे
विवाहादधस्तनदशामेऽहनिपुत्रस्योद्वाहांगंनांदीश्राद्धंकुर्यात् देशांत
रेविवाहेतत्रैवगत्वाकार्यम् तत्रैवंप्रयोगः अद्येत्यादिममसुतस्यवि
वाहादिचतुर्थीकर्मांतंकमंगलकारंत्रांनिमित्तंगंश्राभ्युदयिकश्राद्ध
महंकरिष्ये इति एवंकन्यापित्रादिकार्यं अद्येत्यादिममसुतायाः वि
वाहांगमाभ्युदयिकश्राद्धम.ष्ये॥ विवाह ७.१२

विवाह २००